# भारतीयदर्शनेषु प्रामाण्यवादविमर्शः

डॉ. विनयगोपालत्रिपाठी

सर्वे भारतीयदार्शनिकाः प्रामाण्यवादमाश्रित्य स्वविचारं प्रास्तुवन् । प्रमाणशब्दस्य व्युत्पत्त्यनुसारं प्रामाण्यस्यार्थद्वयं भवति । प्रमीयतेऽनेन इति व्युत्पत्त्या प्रमाणशब्दस्यार्थः[1] प्रमाकरणमिति । प्रमीयते इति प्रमाणमनया व्युत्पत्त्या प्रमाणशब्दस्यार्थः प्रमा ।[2] तथा च प्रमाणस्य भावः प्रमाण्यमिति तर्हि प्रामाण्यं प्रमाकरणत्वमिति अथ च प्रमात्वमिति । प्रमायाः करणत्वं प्रमाणस्य लक्षणं भवति । किं नाम प्रमा ? इति जिज्ञासायाम् अन्नंभट्टैरुच्यते तद्वति तत्प्रकारकोऽनुभवो यथार्थः । यथा अयं घटः इति ज्ञानम् । सैव प्रमा इत्युच्यते ।[3] तद्वति इत्यत्र सप्तम्यर्थः विशेष्यित्वमाशयतय सम्बन्धेन अनुभवान्वयि । एवञ्च तद्वद्विशेष्यकतत्प्रकारकानुभवत्वं प्रमायाः लक्षणम् । तत्पदार्थः प्रकारः तद्वत्वं प्रकारतावच्छेदकसम्बन्धेन बोध्यम् । तथा च कालिकसम्बन्धेन शुक्त्यादौ रजतत्वसत्त्वेऽपि इदं रजतमिति भ्रमस्थलेऽतिव्याप्तिः न भवितुमर्हति । तथाऽपि रङ्गत्वेन रजतावगाहिनि रजतत्वेन च रङ्गावगाहिनी 'इमे रङ्गरजते इत्याकारकसमूहालम्बनभ्रमेऽतिव्याप्तिर्दुर्वारैव । यतो हि रङ्गविशेष्यकत्वरङ्गप्रकारकत्वयोः रजतविशेष्यकत्वरजतत्वप्रकारकत्वयोश्च समूहालम्बनात्मकज्ञाने सत्त्वादिति चेन्न । तद्वद्विशेष्यकतत्प्रकारकानुभवत्वस्य तात्पर्यमस्ति, तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वविशिष्टानुभवत्वमेव प्रमायाः लक्षणम् ।[4] विश्वनाथपञ्चाननभट्टाचार्यो वदति यत् भ्रमभिन्नत्वे सति ज्ञानत्वं प्रमायाः लक्षणम् । अथवा तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वे सति ज्ञानत्वं प्रमायाः लक्षणम् । अत्र विश्वनाथो भणति यत् येन सम्बन्धेन यद्वत्ता तेन सम्बन्धेन तद्वद्विशेष्यकत्वं तेन सम्बन्धेन तत्प्रकारकत्वं वाच्यम् ।[5] दिनकरीकारः प्रमालक्षणस्य परिष्कारं यद्मया पूर्वं निरूपितं तदेव दिनकर्यां वदति । तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्ववज्ज्ञानमिति। प्रकृतस्थले प्रामाण्यशब्देन प्रमात्वमर्थं स्वीकृत्य चर्चामहे । एवमप्रामाण्यं नाम अप्रमात्वं किमपि ज्ञानं प्रामाण्यात् प्रमारूपं भवति, अप्रामाण्याच्च अप्रमारूपं भवति ।

प्रामाण्यीकरणविषये याः समस्याः समुत्पन्नाः भवन्ति ताभिः भिन्नसमस्या अप्रामाण्यीकरणे समुत्पन्ना भवति । भारतीयदार्शनिकाः प्रमात्वमप्रमात्वञ्च विषये पृथक्-पृथक् विचारमकुर्वन् । प्रामाण्याप्रामाण्ययोः सम्बन्धविषये अपरया दृष्ट्या अपि विचारः क्रियते ज्ञप्तिः उत्पत्तिश्च । ज्ञप्तिशब्दार्थः ज्ञानस्य दृष्ट्या, उत्पत्तिशब्दार्थः उत्पत्तेः दृष्ट्या । सर्वे भारतीयदार्शनिकाः अनयोः भेदः सम्यग्रूपेण नाकुर्वन् । स्वतः प्रामाण्यवादः स एव अस्ति यः ज्ञानस्य प्रामाण्यीकरणं केनचिदन्येन ज्ञानेन न स्वीकरोति । स्वतः प्रामाण्यवादस्यानुसारं प्रत्येकस्मिन् ज्ञाने प्रामाण्यं स्वतः भवति । यस्यार्थो विद्यते यज्ज्ञानस्य कारणं तदेव ज्ञानप्रामाण्यस्य कारणं भवति । उभयोः कारणं पृथक्-पृथक् न भवति अपितु एकमेव भवति अर्थात् यैः कारणैः ज्ञानमुत्पद्यते तैः कारणैः ज्ञानस्य प्रमात्वमपि जायते । अस्य सिद्धान्तानुसारं ज्ञानेन सहैव तस्य प्रामाण्यमपि स्वतः ज्ञातं भवति । अयमेव ज्ञप्तेः दृष्ट्या स्वतः प्रामाण्यवादो विद्यते । उत्पत्तेः दृष्ट्या स्वतः प्रामाण्यवादस्यार्थ अस्ति यत् यैः कारणैः ज्ञानमुत्पद्यते तै कारणैः ज्ञानस्य प्रामाण्यमपि उत्पद्यते । अनेन रूपेण ज्ञानस्य ज्ञानप्रामाण्यस्य च एकमेव कारणं भवति । अतः ज्ञानं स्वतः प्रमारूपत्वं भवति ।

परतः प्रामाण्यवादः स एव विद्यते यदा वयं किमपि ज्ञानं कुर्मः तत्र तस्य प्रामाण्यविषये कश्चन निश्चयः न भवति । अन्यतरमन्येन ज्ञानेन वा हेतूना तस्य ज्ञानप्रामाण्यस्य ज्ञानं भवति । अत एव केनचिदुक्तं ज्ञानग्राहकातिरिक्तापेक्षत्वं परतस्त्वम् ।[6] अनेन रूपेण उत्पत्तेः दृष्ट्या तस्य मान्यता विद्यते यत् ज्ञानस्य तथा च तस्य प्रामाण्स्योत्पत्तिः भिन्नैः भिन्नैः कारणैः जायते । ज्ञप्तिपरतस्त्वस्य लक्षणं विद्यते, ज्ञानमात्रग्राहकसामग्रीभिन्नसामग्रीग्राह्यत्वमिति[7], ज्ञानमात्रग्राहकसामग्र्यतिरिक्त-कारणप्रयोज्यत्वम् वा। अनेन रूपेण स्वतः अप्रामाण्यवादस्य परतः अप्रामाण्यवादस्य च अर्थमपि ज्ञातं भवति । स्वतः अप्रामाण्यवादानुसारं कस्यापि ज्ञानस्य अप्रामाण्यस्य ज्ञानं यया सामग्र्या जायते तया सामग्र्या ज्ञानस्याप्रामाण्यमपि जायते । अयमेव ज्ञप्तिः दृष्ट्या स्वतः अप्रामाण्यवादोऽस्ति । उत्पत्तेः दृष्ट्या ज्ञानस्य अथ च तस्य अप्रामाण्यस्य कारणमेकमेव भवति । यदा उभयोः कारणं भिन्नं भिन्नं भवति तदा अप्रामाण्यं परतः इति विद्वांसः वदन्ति । प्रामाण्यस्य स्वतस्त्वम्, प्रामाण्यस्य परतस्त्वम्, अप्रामाण्यस्य स्वतस्त्वम्, अप्रामाण्यस्य

परतस्त्वमेतस्मिन् विषये भारतीयदार्शनिकेषु मतभेदो विद्यते । तथा च स्वतः परतः प्रामाण्यमप्रामाण्यञ्च स्वतो भवति । नैयायिकाः उभयोः परतस्त्वं स्वीकुर्वन्ति । बौद्धदार्शनिकानां मते प्रामाण्यस्य परतस्त्वमप्रामाण्यस्य स्वतस्त्वञ्च भवति । मीमांसकमते प्रामाण्यं स्वतः अप्रामाण्यञ्च परतः भवति । शान्तरक्षितप्रभृतयः बौद्धाः वदन्ति यत् प्रामाण्यमन्यासु अवस्थासु परतो भवति । अनेन रूपेण अप्रामाण्यस्यापि अवस्थासापेक्षत्वात् परतस्त्वमपि भवति । माध्यमिकबौद्धाः अस्य प्रश्नस्य समाधाने क्लिष्टत्वमनुभवन्ति । माधवाचार्यः सर्वदर्शनसङ्ग्रहे ज्ञानस्य प्रामाण्यविषये ज्ञानस्य अप्रामाण्यविषये च चतुर्णां सिद्धान्तानां वर्णनं कुर्वन्ति । तान् सिद्धान्तान् स्वीकृत्य सांख्यदर्शनं ज्ञानस्य प्रामाण्यविषयेऽप्रामाण्यविषये स्वतस्त्वमेव स्वीकरोति । न्यायवैशेषिकयोः मते येन हेतुना ज्ञानं भवति तदतिरिक्तहेतुना ज्ञानस्य प्रामाण्यं गृह्यते । अतः इदं मतं परतस्त्ववादी वर्तते । मीमांसकमते ज्ञानमान्तरिकरूपेण बौद्धो वर्तते । अत्र मतत्रयं विद्यते । प्रभाकरगुरुमतं मुरारिमिश्रमतं कुमारिलभट्टमतञ्च । एतेषां मते येन हेतुना ज्ञानं गृह्यते तेनैव हेतुना ज्ञानप्रामाण्यमपि गृह्यते । अतः एतेषु मतेषु ज्ञानस्य प्रामाण्यं स्वतो भवति । अप्रामाण्यं च परतो भवति । स्वतः परतः प्रामाण्यविषये अप्रामाण्यविषये भारतीयदार्शनिकानां या दृष्टिरस्ति तस्य विवेचनमधोलिखितं विद्यते।

1. न्यायवैशेषिकयोः मते प्रामाण्यं परत अप्रामाण्यञ्च परतो भवति ।[8]
2. सांख्ययोगयोः मते प्रामाण्यं स्वत अप्रामाण्यञ्च स्वतो भवति ।[9]
3. बौद्धमते प्रामाण्यं परत अप्रामाण्यञ्च स्वतो भवति ।[10]
4. मीमांसामते प्रामाण्यं स्वत अप्रामाण्यञ्च परतो भवति ।[11]
5. रामानुजाचार्यमते प्रामाण्यमबाधितज्ञानमस्ति । अत एव प्रामाण्यस्य मानदण्डः अबाधकत्वमस्ति । यद्ज्ञानं बाधितं भवति तच्च ज्ञानं अप्रमा अस्ति ।
6. मधुसूदनसरस्वतीमते प्रामाण्यं नाम ज्ञानस्य यथार्थपरिच्छेदसामर्थ्यम् ।

नैयायिकाः वदन्ति यत् कश्चन अपि मनुष्यः जलादिज्ञानं कृत्वा तस्य प्रामाण्यं ज्ञातुं प्रवृत्तो भवति तदनन्तरं स च यत्र जलं पश्यति तत्र गच्छति । जलं प्राप्य अनुमिनोति मम जलज्ञानं प्रमा आसीत् सफलप्रवृत्तिजनकत्वात् । केशवमिश्रः तर्कभाषायां

प्रामाण्यवाद्विषये महामीमांसकस्य कुमारिलभट्टपादस्य मतमेव अखण्डयत् । स वदति प्रामाण्यवाद इत्यत्र प्रामाण्यशब्दार्थः प्रमाणस्य भावः । अत्र भावार्थे ष्यञ् प्रत्ययो भवति, भावार्थे त्वप्रत्यय अपि भवति । प्रमाणस्य भाव इत्यस्यार्थः प्रामाण्यं प्रमाणत्वं वा तस्यार्थः ज्ञानस्य यथार्थता । अत एव तर्कभाषाकारो वदति यत् ज्ञानस्य याथार्थ्यलक्षणं प्रामाण्यम् ।[12] प्रामाण्यसम्बन्धिवादः प्रामाण्यवादः । सर्वप्रथमं प्रामाण्यविचारः वेदानां प्रामाण्यविषये अभवत् । मण्डनमिश्रस्य गृहस्य विषये केनचिदुक्तम् – स्वतः प्रमाणं परतः प्रमाणं कीराङ्गना यत्र गिरो गिरन्ति । द्वारस्थ नीडान्तर-सन्निरुद्धा जानीहि तन्मण्डन पण्डितौकः ।। अत्र नैयायिकाः वदन्ति प्रवृत्ते पूर्वं प्रामाण्यस्य निश्चयो न भवति अपितु प्रवृत्तिसाफल्यात् प्रामाण्यमनुमीयते ।

न्यायनये ज्ञानस्य ग्रहणमनुव्यवसायेन भवति एवञ्च प्रामाण्यस्य ग्रहणं प्रवृत्तिसाफल्यमूलकानुमानेन भवति । यत्र ज्ञानग्राहिका तत्प्रामाण्यग्राहिका सामग्री च एकैव अस्ति तत्र ज्ञानस्य प्रामाण्यं स्वतः अस्ति इत्युच्यते । अत एव तर्कभाषाकारो वदति ज्ञानग्राहकातिरिक्तानपेक्षत्वमेव स्वतस्त्वं प्रामाण्यस्य ।[13] शास्त्रेषु प्रामाण्यस्य अप्रामाण्यस्य वा स्वतस्त्वं द्विविधं भवति, उत्पत्तिः ज्ञप्तिश्च । उत्पत्तौ स्वतस्त्वं नाम ज्ञानकारणमात्रजन्यत्वम् । ज्ञानं येन जायते तेनैव प्रमाणं सदैव जायते इति । ज्ञप्तौ स्वतस्त्वं तु ज्ञानग्राहकमात्रग्राह्यत्वम् । येन ज्ञानं जायते तेनैव प्रमाणं सदैव ज्ञायते । परतस्त्वमपि द्विविधं भवति उत्पत्तौ ज्ञप्तौ च । तत्र उत्पत्तौ परतस्त्वं च ज्ञानकारणातिरिक्तकारणजन्यत्वम् । इन्द्रियार्थसंयोगादिना ज्ञानं जायते तदतिरिक्तेन गुणेन दोषेण वा तज्ज्ञानस्य प्रामाण्यं वा अप्रामाण्यं जायते । ज्ञप्तौ परतस्त्वं च ज्ञानग्राहकातिरिक्तग्राह्यत्वम् । ज्ञानञ्च मनसा गृह्यते तद्गतं प्रामाण्यमनुमानेन गृह्यते । परतस्त्वविषेय अनुमानस्याकारो विद्यते, विमतं जलज्ञानम्, समर्थप्रवृत्तिजनकत्वात्। अनभ्यासदशायामनुमानप्रयोगो विमतं जलज्ञानं प्रमाणं समर्थप्रवृत्तिजनकज्ञानजातीयत्वात् ।

मीमांसकानां मतमुपस्थापयन् आह – तत्त्वचिन्तामणिकारः 'ननु स्वत एवास्तु तन्निरूपणम्' ।[14] अत्र दीधितिकारो वदति स्वतः स्वस्मात् स्वकीयात् । तत्र स्वप्रकाशतया तेनैव तत्प्रामाण्यं गृह्यते इति गुरुवः ।[15] तदनुव्यवसायेनेति मिश्राः ।[16] ज्ञानस्यातीन्द्रियतया ज्ञाततालिङ्गकानुमित्येति भट्टाः ।[17] स्वतः इत्यत्र स्वपदमात्मपरं

प्रामाण्यवादस्थले आत्मपदेन प्रामाण्याश्रय एव गृह्यते पञ्चम्यर्थः प्रयोज्यत्वं तत्पदस्य पूर्वपरामर्शकतया तन्निरूपणमत्र तत्पदेन प्रामाण्यं गृह्यम्, निरूपणं व्यवहारः स च इदं ज्ञानं प्रमा इत्याकारकशब्दप्रयोगरूप अन्ययोगस्य व्यवच्छेदार्थक एव पदमिति न अपि तु अयोगव्यच्छेदार्थकः एव पदम् । एवञ्च प्रामाण्याश्रयनिष्ठ-प्रयोजकतानिरूपितप्रयोज्यत्वसम्बन्धाभावाभाववान् प्रामाण्यव्यवहारः इति तत्त्व-चिन्तामणिग्रन्थस्यार्थः । स्वप्रकाशतया प्रामाण्यं गृह्यते इति गुरुवः प्रभाकराः स्वप्रकाशतया इत्यत्र प्रयोज्यत्वं तृतीयार्थः । तथा च स्वप्रकाशताप्रयोज्यतद्भिन्नग्रहविषयवत् प्रामाण्यम् । अत्र गदाधरभट्टाचार्यैः उच्यते - 'ननु स्वत एवेति मीमांसकत्रयस्यैव प्रत्यवस्थानम्, न तु गुरोरेव मिश्रभट्टयोरेव वा मतत्रयसाधारणविप्रतिपत्तेरग्रे दर्शनीयत्वात्, अनुव्यवसायेनानुमित्या स्वप्रकाशेन वा गृह्यते इत्यादिना मतत्रयसाधारणस्वतस्त्वस्य व्यवस्थापनीयत्वाच्च, एवं च स्वपदस्य प्रामाण्याश्रयमात्रपरत्वे तदीयमात्रपरत्वे वा न मतत्रयसाधारण्यमतस्तदुभयपरतया व्याचष्टे स्वत इति । स्वस्मादिति ।[18] प्रामाण्याश्रयव्यवसायादेव प्रामाण्यव्यवहारः । मुरारिमिश्रकुमारिलभट्टयोः मतानुसारेण स्वकीयात् स्वप्रयोज्यत्वात् प्रामाण्यव्यवहारः । मुरारिमिश्रमते व्यवसायजन्यो अनुव्यवसाय एव प्रामाण्यप्रयोजको भवति । कुमारिलभट्टमते व्यवसायजन्या ज्ञाततारूपहेतुः जन्यानुमितिरेव ज्ञानस्य ज्ञानं ज्ञानस्य प्रामाण्यञ्च भवति । मिश्रमते व्यवसायजन्योऽनुव्यवसायः एव प्रमात्वस्य प्रयोजकः । भट्टमते लिङ्गकानुमितिरेव प्रामाण्यस्य प्रयोजिका । प्रभाकरगुरूणां मते स्वविषयकत्वमेव ज्ञानस्य स्वप्रकाशत्वम् । गुरुमते चक्षुसंयोगानन्तरमयं घटः घटमहं जानामि इति प्रत्यक्षस्यैव उत्पत्त्या ज्ञातृज्ञानज्ञेयमेतत् तृतीयविषयकत्वमेव ज्ञानं तत्र च ज्ञानं स्वस्वरूपतया स्वं गृह्णाति । चात्मानं विषयतया च घटमवगाहते । गुरुमते ज्ञानमात्रस्य यथार्थत्वेन अप्रमात्मकज्ञानमेव नास्ति । या सामग्री ज्ञानं जनयिष्यति सैव तादृशज्ञाने प्रामाण्यमपि ग्राहयिष्यति । तन्मते ज्ञानत्वस्य ज्ञानधर्मिकप्रामाण्यज्ञानत्वस्य च समनियततया समनियतधर्मावच्छिन्नकार्योत्पादिका सामग्री समनियतधर्मान्तरावच्छिन्नकार्योत्पादिका इति सिद्धान्तो विद्यते । तथा च प्रभाकरमते अयं घटः घटमहं जानामि इत्याकारकज्ञानस्य जायमानत्वेन स्वस्यैव

स्वनिष्ठप्रामाण्यविषयकतया तद्विषयत्वस्य प्रमात्वे सत्त्वेन प्राथमिकज्ञानग्राह्यत्वरूपस्वतस्त्वोत्पपत्तेः । मुरारिमिश्रमते चक्षुस्संयोगानन्तरमयं घटः इत्याकारकव्यवसायात्मकज्ञानान्तरं घटविषयकं घटमहम् जानामि इत्यनुव्यवसायात्मकं लौकिकमानसप्रत्यक्षं तद्विषयत्वस्य प्रमात्वे विद्यमानत्वात् प्रामाण्ये स्वतस्त्वस्योपपत्तिः सम्भवति। कुमारिलभट्टमते ज्ञानमतीन्द्रियमतो न मुरारिमिश्रमतवत् अनुव्यवसायेन प्रामाण्यभानस्योपपत्तिः सम्भवति, परन्तु ज्ञानेन विषये कश्चन ज्ञातता नामकः धर्मविशेषोत्पद्यते स च धर्मः 'ज्ञातो घटः इति प्रतीतिसाक्षिकः विषयताविशेषः प्राकट्यापरपर्यायो वा भवति' तया च ज्ञाततया ज्ञानमनुमीयते । वाक्यप्रयोगस्तु इयं ज्ञातता घटविशेष्यकघटत्वप्रकारकज्ञानसाध्या घटवृत्तिघटत्वप्रकारकज्ञाततात्वात्, या यद्वृत्ति यत्प्रकारिका ज्ञातता सा तद्विशेष्यकतत्प्रकारकज्ञानसाध्या यथा मठे मठत्वप्रकारकज्ञातता मठविशेष्यकमठत्वप्रकारकज्ञानसाध्या इति सामान्यरूपेण व्याप्तिः आश्रीयते । कुमारिलभट्टमते ज्ञानस्यातीन्द्रियत्वेऽपि ज्ञातताप्रत्यक्षसिद्धैव इति व्यवसायेन द्वितीयक्षणे ज्ञाततायां जनितायां तृतीयक्षणे घटत्वप्रकारकत्वेन तत्प्रत्यक्षे जायमाने घटवृत्तिभानस्यावश्यकत्वात् प्रमाव्यापकतावच्छेदकप्रकारेण हेतुग्रहः । गदाधरभट्टाचार्यो वदति मीमांसकमते स्वाश्रयज्ञानग्रहत्वव्यापकविषयितानिरूपकत्वं स्वतोग्राह्यत्वम् ।[19] तत्त्वचिन्तामणिकारः स्वतः परतश्च प्रामाण्यविषये विप्रतिपत्तिं न्यरूपयत्, तत्र प्रथमा विप्रतिपत्तिरस्ति । 'ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यं न वा ।[20]' अत्र विधिकोटिः मीमांसकानां निषेधकोटिः नैयायिकानाञ्च विद्यते । संक्षिप्तरूपेण भारतीयदर्शनेषु प्रामाण्यवादस्य यत् स्वरूपमुपलभ्यते तत् मया निरूपितम् । विस्तरभयादत्रैव विरम्यते।

## सन्दर्भाः-


1. प्र उपसर्ग पूर्वकः मा धतुतः करणे ल्यूट् प्रत्ययः
2. प्र उपसर्ग पूर्वकः मा धतुतः भावे ल्यूट् प्रत्ययः
3. अन्नंभट्टप्रणीततर्कसङ्ग्रहः प्रकाशव्याख्यासहितदीपिकायुतसानुवादनरहरिव्याख्यासंवलितम्, चौखम्बा सुरभारती, वाराणसी पृ. सं. 50

4. कारिकावली 134
5. न्यायसिद्धान्तमुक्तावली दिनकरीरामरुद्रीसंवलिता पृ. सं. 50
6. न्यायसिद्धान्तमुक्तावली गुण खण्ड प्रभा टीका पृ. 409
7. न्यायसिद्धान्तमुक्तावली गुण खण्ड प्रभा टीका पृ. 409
8. तत्त्वचिन्तामणिगदाधरीप्रामाण्यवादः
9. सर्वदर्शनसंग्रहे जैमिनीदर्शनम् पृ. स. 477
10. सर्वदर्शनसंग्रहे जैमिनीदर्शनम् पृ. स. 476
11. सर्वदर्शनसंग्रहे जैमिनीदर्शनम् पृ. स. 477
12. तर्कभाषा प्रामाण्यवाद 268 हिन्दी अनुवादक – डॉ. सुरेन्द्र देव शास्त्री, चौखम्बा विद्याभवन, वाराणसी 2003
13. तर्कभाषा प्रामाण्यवाद 268
14. तत्त्वचिन्तामणि प्रामाण्यवाद पृ 52
15. प्रामाण्यवाद दीधित पृ. 52
16. प्रामाण्यवाद दीधित पृ. 55
17. प्रामाण्यवाद दीधित पृ. 56
18. गदाधरी पृ. 52
19. प्रामाण्यवाद पृ. 58
20. प्रामाण्यवाद तत्त्वचि पृ. 59

❋ ❋ ❋